# PAPER – II

# SANSKRIT

**Note :** Answer all the questions. Each question carries *two* (2) marks.

**1.** अग्निमीळे पुरोहितमित्यस्य मन्त्रस्य कः ऋषिः?

1) जमदग्निः
2) विश्वामित्रः
3) वामकः
4) मधुच्छन्दाः

**2.** यो विश्वस्य प्रतिमानं बभूवेत्यत्र का देवता स्तुता?

1) वरुणः
2) उषाः
3) अग्निः
4) इन्द्रः

**3.** दूरङ्गमं ज्योतिषां ज्योतिरिति किम्?

1) आत्मा
2) मनः
3) हृदयम्
4) प्राणः

**4.** कस्य वेदस्यस्ति जाजलशाखा?

1) सामदेवः
2) यजुर्वेदः
3) ऋग्वेदः
4) अथर्ववेदः

**5.** देवताध्यायब्राह्मणस्य तृतीये खण्डस्य विषयः कः?

1) देवतानां वर्णनम्
2) छन्दसां निरुक्तयः
3) बलिवर्णनम्
4) यागविधिः

**6.** आरुणकेतुकनामकस्याग्नेर्वर्णनं कस्मिन्नारण्यकेऽस्ति?

1) ऐतरेयारण्यके
2) शांखायनारण्यके
3) कौषीतक्यारण्यके
4) तैत्तिरीयारण्यके

**7.** शिक्षावाल्ली कस्यामुपनिषदि वर्तते?

1) प्रश्नोपनिषदि
2) छान्दोग्योपनिषदि
3) तैत्तिरीयोपनिषदि
4) माण्डूक्योपनिषदि

Prepp
Your Personal Exams Guide

**8.** जीवब्रह्मप्रकृतितत्त्वत्रयस्य सविस्तरं सुस्पष्टश्च वर्णनं कस्यामुपनिषदि विद्यते?

1) मुण्डकोपनिषदि
2) ऐतरेयोपनिषदि
3) कठोपनिषदि
4) श्वेताश्वतरोपनिषदि

**9.** चातुर्वर्ण्यस्य चातुराश्रम्यस्य च विवेचनं कस्मिन् सूत्रे विहितमस्ति?

1) श्रौतसूत्रे
2) गृह्यसूत्रे
3) धर्मसूत्रे
4) शुल्बसूत्रे

**10.** शाखाविशेषस्य विशेषनियमानां विवेचनं कुत्रोपलभ्यते?

1) ज्यौतिषे
2) छन्दसि
3) शिक्षाग्रन्थेषु
4) प्रातिशाख्येषु

**11.** दु:खमुक्तेरानुश्रविकविधिरथवा वैदिकविधि: कीदृश्यस्ति?

1) शुद्धा
2) व्यक्ता
3) सत्या
4) अविशुद्धिक्षयातिशययुक्ता

**12.** कार्यतस्तदुपलब्धेरित्यत्र कस्यास्तित्वं सिद्धं कृतमस्ति?

1) पुरुषस्य
2) महत्तत्त्वस्य
3) तन्मात्राणाम्
4) प्रकृते:

**13.** निर्गतनिखिलकल्मषतया साधनचतुष्टयसम्पन्न: प्रमाता कस्याधिकारी?

1) वेदान्तस्य
2) ब्रह्मसूत्रस्य
3) उपनिषद:
4) श्रीमद्भगवद्गीताया:

**14.** वेदान्तसारानुसारं, ज्ञानेन्द्रियकर्मेन्द्रियदशकं बुद्धिमनसी चातिरिच्य लिङ्गशरीरस्य केऽवयवा:?

1) देवदत्तादय वायव:
2) प्राणादय वायव:
3) कर्माशयादय:
4) चित्ताहङ्कारादय:

**15.** कृशोऽहमित्यत्र वेदान्तानुसारेण केन भवितव्यम्?

1) अध्यासेन
2) महता
3) मनसा
4) आत्मना

**16.** नित्या पृथिव्यस्ति ---

1) कार्यरूपा
2) ज्ञानरूपा
3) बृहत्स्वरूपा
4) परमाणुरूपा

**17.** गुणा: न सन्ति ---

1) संयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दा:
2) रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वानि
3) उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि
4) बुद्धिसुखदु:खेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कार:

**18.** अन्वयव्यतिरेकदृष्टान्तरहित: हेत्वाभास: ---

1) साधारण:
2) असाधारण:
3) सत्प्रतिपक्ष:
4) अनुपसंहारी

**19.** जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्चेत्यत्र कस्य सिद्धि: ख्यापिता?

1) पुरुषबहुत्वस्य
2) प्रकृतेरेकत्वस्य
3) त्रिगुणस्य
4) निरीश्वरत्वस्य

**20.** वेदान्तशब्दस्य प्रथमप्रयोग: कस्यामुपनिषदि प्राप्यते?

1) छान्दोग्योपनिषदि
2) माण्डूक्योपनिषदि
3) प्रश्नोपनिषदि
4) मुण्डकोपनिषदि

**21.** ङिति ह्रस्वश्चेत्यत्र कस्या: सञ्ज्ञाया विधानमस्ति?

1) घि
2) नदी
3) भ
4) पद

**22.** प्रातिपदिकसञ्ज्ञाविधायकं सूत्रमस्ति ---

1) ङ्याप्प्रातिपदिकात्
2) अर्थवदधातुरप्रत्यय: प्रातिपदिकम्
3) प्रातिपदिकान्नुम् विभक्तिषु च
4) प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा

**23.** पति: शब्दस्य घिसञ्ज्ञा न भवति यतोहि –

1) इकारान्तपदमस्ति
2) पुँल्लिङ्गेऽस्ति
3) स्त्रीलिङ्गेऽस्ति
4) समासपदो नास्ति

**24.** इन्द्राणीत्यत्र क आगम:?

1) आनुक्
2) नुक्
3) नुट्
4) नुम्

**25.** द्वियमुनमित्यत्र क: समास:?

1) द्विगु:
2) कर्मधारय:
3) अव्ययीभाव:
4) बहुव्रीहि:

Prepp
Your Personal Exams Guide

**26.** उपबुद्धमित्यस्य अलौकिकविग्रहोऽस्ति ---

1) उप बुद्ध ङि
2) बुद्ध ङस् उप
3) उप बुद्ध ङे
4) उप बुद्ध टा

**27.** अन्तर्मुखीश्लिष्टसंयोगात्मकभाषाया उदाहरणमस्ति ---

1) अरबीभाषा
2) पञ्जाबीभाषा
3) जर्मनभाषा
4) जापानीभाषा

**28.** बहिर्मुखीवियोगात्मकभाषाया उदाहरणमस्ति ---

1) संस्कृतभाषा
2) हिन्दीभाषा
3) तिब्बतीभाषा
4) कोरियायीभाषा

**29.** भारोपीयध्वनयः संस्कृत-यावनी-लातिनीभाषासु सुरक्षिताः सन्ति, किन्तु व्यञ्जनानि तु संस्कृतभाषायामेव विशुद्धरूपेणोपलभ्यन्त इत्येषा कस्य नियमस्यावधारणास्ति?

1) ग्रिम-नियमस्य प्रथमध्वनिपरिवर्तनस्य
2) ग्रिम-नियमस्य द्वितीयध्वनिनियमस्य
3) ग्रासमैन-नियमस्य
4) वर्नर-नियमस्य

**30.** अयोगात्मभाषाया उदाहरणमस्ति ---

1) संस्कृतभाषा
2) तमिळभाषा
3) सिंहलीभाषा
4) तिब्बतीभाषा

**31.** नलराजा कस्य पुत्र आसीत्?

1) दिलीपस्य
2) व्युषिताश्वस्य
3) कुशस्य
4) निषधस्य

**32.** काशिकायां किरातार्जुनीयस्य किं पद्यमुद्धृतं विलसति?

1) 3.14
2) 4.12
3) 13.14
4) 14.14

**33.** बुद्धचरितस्य कति सर्गाः मूलसंस्कृतपाठ उपलभ्यन्ते?

1) 28
2) 18
3) 8
4) 14

**34.** लिट्लकारस्य रमणीयप्रयोगं कस्मिन् काव्ये विलसति?

1) कुमारसम्भवे
2) नैषधीयचरिते
3) शिशुपालवधे
4) बुद्धचरिते

**35.** शुकनाशोपदेशवन्नैतिकशिक्षाप्रदं वर्णनं दशकुमारचरितस्य कस्मिन् भागे वर्तते?

1) प्रथमे
2) द्वितीये
3) चतुर्थे
4) अष्टमे

**36.** कस्मिन् संस्कृतनाटके सम्राट् चन्द्रगुप्तमौर्यो वृषल इत्युक्तः?

1) मृच्छकटिके
2) उत्तररामचरिते
3) मुद्राराक्षसे
4) स्वप्नवासवदत्ते

**37.** शशाङ्कः कस्य गद्यकाव्यस्य पात्रमस्ति?

1) कादम्बर्याः
2) दशकुमारचरितस्य
3) हर्षचरितस्य
4) शिवराजविजयस्य

**38.** रत्नावलीनाटिका केन लिखिता?

1) कालिदासेन
2) विशाखदत्तेन
3) शूद्रकेण
4) हर्षवर्द्धनेन

**39.** अभिज्ञानशाकुन्तलनाटके अभिज्ञानमिति किम्?

1) आङ्गुलीयकम्
2) दुष्यन्तरथः
3) कण्वस्य दिव्यज्ञानम्
4) भरतदर्शनम्

**40.** हिमालयस्य वर्णनं प्रारभ्यते ---

1) बुद्धचरितम्
2) मेघदूतम्
3) किरातार्जुनीयम्
4) कुमारसम्भवम्

**41.** साहित्यदर्पणस्य द्वितीयपरिच्छेदे वर्णितमस्ति ---

1) ध्वनिकाव्यम्
2) नाटकम्
3) गुणाः
4) वाक्य-पद-शब्दशक्तयः

**42.** वामनानुसारेण काव्यस्य लक्षणमस्ति ---

1) काव्यस्यात्मा ध्वनि:
2) वक्रोक्ति: काव्यजीवितम्
3) शब्दार्थौ सहितौ काव्यम्
4) रीतिरात्मा काव्यस्य

**43.** अलङ्काराणां वर्णनं कस्मिन् परिच्छेदे वर्तते?

1) प्रथमे
2) पञ्चमे
3) सप्तमे
4) दशमे

**44.** शक्तिग्रहस्य कारणं नास्ति ---

1) कोश:
2) आप्तवाक्यम्
3) वाक्यशेष:
4) भिन्नभाषाया ध्वनय:

**45.** अविरुद्धा विरुद्धा वा --- इति कस्य लक्षणमस्ति?

1) रसस्य
2) अलङ्कारस्य
3) स्थायिभावस्य
4) विभावस्य

**46.** उत्साह: कस्य स्थायिभावोऽस्ति?

1) शृङ्गाररसस्य
2) हास्यरसस्य
3) रौद्ररसस्य
4) वीररसस्य

**47.** प्रकरणमिति क:?

1) काव्यभेद:
2) गद्यकाव्यस्य भेद:
3) नाटकभेद:
4) रसभेद:

**48.** निन्दनीयपुरुष: कस्य नायको भवति?

1) नाटकस्य
2) भाणस्य
3) ईहामृगस्य
4) प्रहसनस्य

**49.** विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति कुत्रोपलभ्यते?

1) काव्यप्रकाशे
2) नाट्यशास्त्रे
3) महाभारते
4) साहित्यदर्पणे

Prepp
Your Personal Exams Guide

**50.** व्यञ्जनाया युक्तियुक्तसिद्धिः कस्मिन् परिच्छेदे दर्शिता?

1) प्रथमे
2) षष्ठे
3) तृतीये
4) पञ्चमे

**51.** आर्षकाव्येषु चतुर्विंशतिसाहस्री ---

1) महाभारतम्
2) रामायणम्
3) नैषधीयचरितम्
4) किरातार्जुनीयम्

**52.** श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते?

1) सभापर्वणि
2) आदिपर्वणि
3) उद्योगपर्वणि
4) भीष्मपर्वणि

**53.** रामायणे कति सर्गाः सन्ति?

1) 21
2) 221
3) 321
4) 500

**54.** अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः – इति सूक्तिः उपलभ्यते?

1) रामायणे
2) महाभारते
3) बुद्धचरिते
4) सौन्दरनन्दे

**55.** शिशुपालोपाख्यानं कस्मिन् पर्वणि विद्यते?

1) वनपर्वणि
2) सभापर्वणि
3) उद्योगपर्वणि
4) शान्तिपर्वणि

**56.** शाकुन्तलोपाख्यानं कुत्र मिलति?

1) आदिपर्वणि
2) भीष्मपर्वणि
3) सभापर्वणि
4) वनपर्वणि

**57.** वेदानां वास्तविकं स्वरूपं पुराणेष्वेव वणितम् – इति कस्योक्तिः?

1) नारदपुराणस्य
2) विष्णुपुराणस्य
3) अग्निपुराणस्य
4) ब्रह्माण्डपुराणस्य

**58.** मौर्यवंशीयराज्ञां वर्णनं करोति ---

1) भागवतपुराणम्
2) नारदपुराणम्
3) अग्निपुराणम्
4) विष्णुपुराणम्

Prepp
Your Personal Exams Guide

**59.** गुप्तसाम्राज्यस्य वर्णनमुपस्थापयति ---

1) वायुपुराणम्
2) विष्णुपुराणम्
3) नारदपुराणम्
4) अग्निपुराणम्

**60.** उद्भिजविद्याया: प्रकाशकं पुराणमस्ति ---

1) वराहपुराणम्
2) मानवपुराणम्
3) भविष्यपुराणम्
4) देवीभागवतपुराणम्

**61.** अर्थशास्त्रकारस्य विष्णुगुप्तस्य कालोऽस्ति ---

1) 322 ई.पू.
2) 222 ई.पू.
3) 132 ई.पू.
4) 500 ई.

**62.** कस्य मते – एका दण्डनीतिरेव विद्या?

1) शुक्राचार्यस्य
2) विष्णुगुप्तस्य
3) मनो:
4) बृहस्पते:

**63.** द्विजातिशुश्रूषा वार्ता च कस्य धर्मौ स्त:?

1) वैश्यस्य
2) ब्राह्मणस्य
3) शूद्रस्य
4) क्षत्रियस्य

**64.** अभिजनप्रज्ञाशौचशौर्यानुरागयुक्तानमात्यान् कुर्वीत – इति ---

1) विशालाक्ष:
2) वातव्याधि:
3) भारद्वाज:
4) बाहुदन्तीपुत्र:

**65.** सेनापतेर्नियुक्तेराधार: ---

1) धर्मोपधा
2) अर्थोपधा
3) कामोपधा
4) भयोपधा

**66.** मनुमते कस्मादाकाश उद्भूत:?

1) मनस:
2) वायो:
3) सूर्यात्
4) चन्द्रात्

Prepp
Your Personal Exams Guide

**67.** न स्त्री स्वातन्त्र्यमर्हति – इति वचनं कुत्रास्ति?

1) मनुस्मृतौ
2) याज्ञवल्क्यस्मृतौ
3) अर्थशास्त्रे
4) पाराशरस्मृतौ

**68.** याज्ञवल्क्यस्मृतौ कति श्लोका: सन्ति?

1) 367
2) 672
3) 307
4) 1009

**69.** धर्मपत्नीज: पुत्रो भवति ---

1) पुत्रिका
2) पुत्र:
3) औरस:
4) क्षेत्रज:

**70.** गृहे प्रच्छन्न उत्पन्न: पुत्र:---

1) औरस:
2) क्षेत्रज:
3) गूढज:
4) कानीन:

**71.** बृहत्त्रय्यां परिगणितं नास्ति ---

1) नैषधीयचरितम्
2) शिशुपालवधम्
3) रघुवंशम्
4) किरातार्जुनीयम्

**72.** रघुवंशस्योपजीव्यग्रन्थोऽस्ति ---

1) अध्यात्मरामायणम्
2) उत्तररामचरितम्
3) वाल्मीकिरामायणम्
4) रामोपाख्यानम्

**73.** महाकवे: कालिदासस्य समयसीमा स्वीक्रियते ---

1) 150 ई.पू – 475 ई.
2) 600 ई.पू – 150 ई.
3) 326 ई.पू – 150 ई.
4) 475 ई. – 600 ई.

**74.** छाया हि भूमे: शशिनो मलत्वेनारोपिता शुद्धिमत: – इति सूक्ति: कुत:?

1) शिशुपालवधात्
2) किरातार्जुनीयात्
3) रघुवंशात्
4) कुमारसम्भवात्

**75.** रघुवंशे सीतापरित्यागनामक: सर्गविशेष: क:?

1) 1
2) 5
3) 14
4) 15

**76.** हितं च मनोहारि च दुर्लभं वचः – कस्येयमुक्तिः?

1) द्रौपद्याः
2) युधिष्ठिरस्य
3) अर्जुनस्य
4) वनेचरस्य

**77.** दशकुमारचरिते राजवाहनस्य पिता कः?

1) मानसारः
2) राजहंसः
3) चन्द्रसेनः
4) वसुरक्षितः

**78.** विश्रुतचरिते कूपपतितस्य भास्करवर्मणः सहायको वृद्धः कः?

1) मातङ्गः
2) नालीजङ्घः
3) वसुरक्षितः
4) सिन्धुदत्तः

**79.** तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि – इति कस्य काव्यपरिभाषा?

1) भोजस्य
2) विश्वनाथस्य
3) मम्मटस्य
4) रुद्रटस्य

**80.** शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं ---

1) उत्तकाव्यम्
2) मध्यमकाव्यम्
3) गुणीभूतव्यङ्ग्यकाव्यम्
4) अधमकाव्यम्

**81.** अन्विताभिधानवादी कः?

1) पार्थसारथिमिश्रः
2) श्यामानन्दनमिश्रः
3) प्रभाकरमिश्रः
4) वाचस्पतिमिश्रः

**82.** अर्थो हि कन्या परकीय एव – इत्युक्तिः कस्य?

1) दुष्यन्तस्य
2) कण्वस्य
3) शार्ङ्गधरस्य
4) शारद्वतस्य

**83.** अभिज्ञानशाकुन्तले विदूषकः कः?

1) मैत्रेयः
2) वसन्तकः
3) माढव्यः
4) कुसुमाकरः

Prepp
Your Personal Exams Guide

**84.** कस्मिन् नाटके गर्भाङ्क–नाटकस्य योजना विद्यते?

1) अभिज्ञानशाकुन्तले 2) मुद्राराक्षसे
3) विक्रमोर्वशीये 4) उत्तररामचरिते

**85.** भवभूते: काव्यशैली का?

1) वैदर्भी 2) गौडी
3) वैदर्भी गौडी च 4) पाञ्चाली

**86.** उत्तररामचरिते शम्बूकवधोऽस्ति ––––

1) बीज: 2) बिन्दु:
3) पताका 4) प्रकरी

**87.** विशाखदत्तस्य काल: स्वीक्रियते –––

1) 300 ई. – 400 ई. 2) 100 ई. – 50 ई.
3) 620 ई. – 720 ई 4) 500 ई.पू – 400 ई.पू

**88.** वध्यस्थानाच्छकटदासमपहरति रक्षति च –––

1) सिद्धार्थक: 2) समिद्धार्थक:
3) भागुरायण: 4) चन्द्रगुप्त:

**89.** कौशाम्बीनरेशस्योदयनस्य मन्त्री क:?

1) वाभ्रव्य: 2) वसुभूति
3) यौगन्धरायण: 4) विजयवर्मा

**90.** सिंहलेशवर: क:?

1) विक्रमबाहु: 2) वाभ्रव्य:
3) वसुभूति: 4) यौगन्धरायण:

**91.** तर्कसङ्ग्रहस्य दीपिका टीका केन लिखिता?

1) वाचस्पतिमिश्रेण 2) अन्नम्भट्टेन
3) केशवमिश्रेण 4) उदयनेन

**92.** तेजस: प्रभेदेषु भौमम् –––

1) विद्युदादि: 2) वह्न्यादि:
3) उदर्यम् 4) सुवर्णादि:

Prepp
Your Personal Exams Guide

**93.** भुक्तस्य परिणामहेतु: ---

1) उदर्यम्　　2) भौमम्

3) दिव्यम्　　4) आकरजम्

**94.** तदभाववति तत्प्रकारकोऽनुभव: ---

1) अनिर्वचनीय:　　2) प्रमा

3) अयथार्थ:　　4) ज्ञानाधिकरणम्

**95.** कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम् ---

1) समवायिकारणम्　　2) असमवायिकारणम्

3) निमित्तकारणम्　　4) सर्वम्

**96.** यत्र यत्र धूमस्तत्र तराग्निरिति साहचर्यनियम: ---

1) पक्षता　　2) परामर्श:

3) अनुमिति:　　4) व्याप्ति:

**97.** यस्य साध्याभाव: प्रमाणान्तरेण निश्चित: स: ---

1) बाधित:　　2) विरुद्ध:

3) सत्प्रतिपक्ष:　　4) अनैकान्तिक:

**98.** अनादि: सान्त अभाव: ---

1) प्रागभाव:　　2) प्रध्वंसाभाव:

3) अन्योऽन्याभाव:　　4) अत्यन्ताभाव:

**99.** त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताक: ---

1) प्रागभाव:　　2) अत्यन्ताभाव:

3) अन्योऽन्याभाव:　　4) प्रध्वंसाभाव:

**100.** शरीरस्य सन्निकृष्टसंयोगहेतु: ---

1) संस्कार:　　2) आकुञ्चनम्

3) प्रसारणम्　　4) उत्क्षेपणम्

www.prepp.in

## ROUGH WORK

www.prepp.in

Prepp
Your Personal Exams Guide

ROUGH WORK

Prepp Your Personal Exam Guide